# Shri Rama Ashtottarashatanama Stotram

# શ્રીરામાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : shriiraamaashhTottarashatanaamastotram.h

File name : raama108st.itx

Category : aShTottarashatanAma, raama, stotra

Location : doc_raama

Transliterated by : Sowmya Ramkumar - ramkumar at batelco.com.bh

Proofread by : Sowmya Ramkumar

Source : padmapurANa

Latest update : July 4, 2006

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 29, 2020

*sanskritdocuments.org*

# શ્રીરામાષ્ટોત્તરશતનામસ્તોત્રમ્

ધ્યાનમ્ -
શ્રીરાઘવં દશરથાત્મજમપ્રમેયં
  સીતાપતિં રઘુકુલાન્વયરત્નદીપમ્ ।
આજાનુબાહુમરવિન્દદલાયતાક્ષં
  રામં નિશાચરવિનાશકરં નમામિ ॥

વૈદેહીસહિતં સુરદ્રુમતલે હૈમે મહામણ્ડપે
  મધ્યે પુષ્પકમાસને મણિમયે વીરાસને સુસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જનસુતે તત્ત્વં મુનિભ્યઃ પરં
  વ્યાખ્યાન્તં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥

ૐ શ્રીરામો રામભદ્રશ્ચ રામચન્દ્રશ્ચ શાશ્વતઃ ।
રાજીવલોચનઃ શ્રીમાન્ રાજેન્દ્રો રઘુપુઙ્ગવઃ ॥ ૧॥

જાનકીવલ્લભો જૈત્રો જિતામિત્રો જનાર્દનઃ ।
વિશ્વામિત્રપ્રિયો દાન્તઃ શત્રુજિચ્છત્રુતાપનઃ ॥ ૨॥

વાલિપ્રમથનો વાગ્મી સત્યવાક્ સત્યવિક્રમઃ ।
સત્યવ્રતો વ્રતધરઃ સદા હનુમદાશ્રિતઃ ॥ ૩॥

કૌસલેયઃ ખરધ્વંસી વિરાધવધપણ્ડિતઃ ।
વિભીષણપરિત્રાતા હરકોદણ્ડખણ્ડનઃ ॥ ૪॥

સપ્તતાલપ્રભેત્તા ચ દશગ્રીવશિરોહરઃ ।
જામદગ્ન્યમહાદર્પદલનસ્તાટકાન્તકઃ ॥ ૫॥

વેદાન્તસારો વેદાત્મા ભવરોગસ્ય ભેષજમ્ ।
દૂષણત્રિશિરો હન્તા ત્રિમૂર્તિસ્ત્રિગુણાત્મકઃ ॥ ૬॥

ત્રિવિક્રમસ્ત્રિલોકાત્મા પુણ્યચારિત્રકીર્તનઃ ।
ત્રિલોકરક્ષકો ધન્વી દણ્ડકારણ્યપાવનઃ ॥ ૭॥

અહલ્યાશાપશમનઃ પિતૃભક્તો વરપ્રદઃ ।
જિતેન્દ્રિયો જિતક્રોધો જિતામિત્રો જગદ્ગુરુઃ ॥ ૮॥

ઋક્ષવાનરસંઘાતી ચિત્રકૂટસમાશ્રયઃ ।
જયન્તત્રાણવરદઃ સુમિત્રાપુત્રસેવિતઃ ॥ ૯॥

સર્વદેવાદિદેવશ્ચ મૃતવાનરજીવનઃ ।
માયામારીચહન્તા ચ મહાદેવો મહાભુજઃ ॥ ૧૦॥

સર્વદેવસ્તુતઃ સૌમ્યો બ્રહ્મણ્યો મુનિસંસ્તુતઃ ।
મહાયોગી મહોદારઃ સુગ્રીવેપ્સિતરાજ્યદઃ ॥ ૧૧॥

સર્વપુણ્યાધિકફલઃ સ્મૃતસર્વાઘનાશનઃ ।
આદિદેવો મહાદેવો મહાપૂરુષ એવ ચ ॥ ૧૨॥

પુણ્યોદયો દયાસારઃ પુરાણપુરુષોત્તમઃ ।
સ્મિતવક્ત્રો મિતાભાષી પૂર્વભાષી ચ રાઘવઃ ॥ ૧૩॥

અનન્તગુણગમ્ભીરો ધીરોદાત્તગુણોત્તમઃ ।
માયામાનુષચારિત્રો મહાદેવાદિપૂજિતઃ ॥ ૧૪॥

સેતુકૃજ્જિતવારીશઃ સર્વતીર્થમયો હરિઃ ।
શ્યામાઙ્ગઃ સુન્દરઃ શૂરઃ પીતવાસા ધનુર્ધરઃ ॥ ૧૫॥

સર્વયજ્ઞાધિપો યજ્વા જરામરણવર્જિતઃ ।
શિવલિઙ્ગપ્રતિષ્ઠાતા સર્વાવગુણવર્જિતઃ ॥ ૧૬॥

પરમાત્મા પરં બ્રહ્મ સચ્ચિદાનન્દવિગ્રહઃ ।
પરં જ્યોતિઃ પરંધામ પરાકાશઃ પરાત્પરઃ ॥ ૧૭॥

પરેશઃ પારગઃ પારઃ સર્વદેવાત્મકઃ પરઃ ॥

॥ ઇતિ શ્રીરામાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Transliterated by Sowmya Ramkumar

*Shri Rama Ashtottarashatanama Stotram*

pdf was typeset on December 29, 2020

Please send corrections to *sanskrit@cheerful.com*